शास्त्री-I

साहित्य

## अभिज्ञान शाकुन्तलम्

### षष्ठोऽङ्कः

Date ___/___/___

(1) प्र० - पद्य मिदम् व्याख्येयम् ।

यो हनिष्यति वध्यं त्वां रक्ष्यं रक्षति च द्विजम् ।
हंसो हि क्षीरमादत्ते तन्मिश्रा वर्जयत्यपः ॥

उत्तरम् - प्रसंगः - प्रस्तुतोऽयं श्लोकः महाकवि कालिदास प्रणीतस्य अभिज्ञानशाकुन्तलम नाट्यशास्त्रस्य षष्ठोऽङ्कात् उद्धृतोऽस्ति । अस्मिन् श्लोके तिरस्कारिणीविद्या गोपितं सत्वं चक्षुषा अपश्यन् राजा दुष्यन्तः धनुषि बाणं संयोजयन् ब्रवीति - यः = य इषुः वधमर्हः वध्यस्तं वध्यं पापकरणात् वधार्हं त्वां हनिष्यति = प्रहरिष्यति मारयिष्यति रक्षितुं योग्यो रक्ष्य । तं रक्ष्यं = रक्षण योग्यं द्विजं = विप्रं माधव्यम् रक्षति = रक्षयिष्यति तमिषुं सन्दधे । हि = यस्मात् कारणात् हंसः = मरालः क्षीरं = दुग्धम् आदत्ते = गृह्णाति तन्मिश्राः = तेन मिश्राः तन्मिश्राः दुग्धसंमिश्राः अपः = जलानि वर्जयति = त्यजति । हंस इव मे बाणः, क्षीरमिव त्वम् आप इव माधव्यो ब्राह्मणः । तस्मात्त्वमेव मे बाणस्य ग्राह्यः, माधव्यस्त्याज्यः ।

अर्थभावः - अयं आदर्शनविद्यया अहंकारवान् । यद्यप्यहं त्वां द्रष्टुं न पारयामि तथापि ममायुधं त्वां नूनं द्रक्ष्यति, हनिष्यति च । अहमिदानीमेव विषं दिव्यं बाणं धनुषि संयोजयामि योऽपराधिनं त्वां हनिष्यत्येव रक्षणीयश्च माधव्यं रक्षिष्यति । यथा पानीयेन मिश्रितात् दुग्धात् हंसो दुग्धमात्रमादत्ते पानीयं च परित्यजति तथैव हंससमानो मे बाणो दुग्धतुल्यं त्वां मारयिष्यति पानीयसदृशं माधव्यं परित्यजेदेव तस्मान्नाधुना किमप्यस्ति ते शरणमिति तात्पर्यम् । अत्र दृष्टान्तालंकारोऽनुष्टुप वृत्तम् च विद्यते ।

Renu Devi
22/08/20

राधा उमाकान्त सं० महावि०

उपशास्त्री-II साहित्य - तृतीय - पत्रम
रघुवंश महाकाव्यम् - द्वितीय: सर्ग:

Date __/__/__

(1)प्र० पद्यमिदम् व्याख्येयम् ।
तथेति गामुक्तवते दिलीपः सद्यः प्रतिष्टम्भविमुक्तबाहुः ।
स न्यस्तशस्त्रो हरये स्वदेहमुपानयत्पिण्डमिवामिषस्य ॥

उत्तरम्-प्रसंगः – प्रस्तुतोऽयं श्लोकः महाकवि कालिदास प्रणीतस्य रघुवंश-महाकाव्यस्य द्वितीय सर्गात् उद्धृतोऽस्ति।
अस्मिन् श्लोके सिंहः राजा दिलीपस्य प्रार्थना स्वीकृतं करोति।
तथास्तु इत्युक्त्वा राज्ञः प्रार्थनां स्वीकृतवते सिंहाय तत्काले प्रतिरोध्यात् मुक्तभुजो राजा दिलीपः स्वं शरीरं मांसपिण्डमिव उपहृतवान्।

व्याख्या – तथा = अस्त्वेवम्, इति = इत्थं, गां = वाचम्, उक्तवते = कथितवं हरये = सिंहाय, सद्यःप्रतिष्टम्भविमुक्तबाहुः = तत्क्षण विगतहस्तावरो सः = राजा दिलीपः, न्यस्तशस्त्रः = त्यक्तायुधः सन्, स्वदेहं = निज-शरीरम्, आमिषस्य = मांसस्य, पिण्डमिव = कवलमिव, आनय उपाहरत्।

Renu devi
22/08/20
राधा उमाकान्त सं० महावि० सुखसेना, पूर्णिया

उपशास्त्री - I साहित्य - तृतीय - पत्र
रघुवंश - महाकाव्यम् - द्वितीयः सर्गः

Date ___/___/___

प्र० (1) - किमप्यहिंस्यस्तव चेन्मतोऽहं यशःशरीरे भव मे दयालुः।
एकान्तविध्वंसिषु मद्विधानां पिण्डेष्वनास्था खलु भौतिकेषु॥

उत्तरम् - प्रसंगः - प्रस्तुतोऽयं श्लोकः महाकवि कालिदास प्रणीतस्य रघुवंश महाकाव्यस्य द्वितीय सर्गात् उद्धृतोऽस्ति।

अस्मिन् श्लोके राजा दिलीपः सिंहम्प्रत्युवाच - हे मृगेन्द्र! जगत्पालकत्वादिना यदि मामवध्यं मनुषे, तर्हि मदीयं यश एव परिरक्ष्यं भवत न तु पाञ्चभौतिकं कलेवरं रक्ष्यम्। गवार्थे मृतस्य मे यशः चिरस्थायि भविष्यति। मादृशा जनाः अवश्यं विनाशिषु पाञ्चभौतिकस्थूलशरीरेषु स्पृहां न कुर्वन्ति। त्वं तस्मान्मामवश्यं व्यापादय।

व्याख्या - किमपि = किं वा अथवा, अहं = दिलीपः, तव = भवतः सिंहस्य, अहिंस्यः = अवध्यः, मतश्चेत् = सम्मतो यदि तर्हि मे = मम दिलीपस्य, यशःशरीरे = कीर्तिकलेवरे, दयालुः = कृपालुः, कारुणिको वा भव, एतदेव परिपालय, मद्विधानां = मादृशानां, एकान्तविध्वंसिषु = अवश्यविनाशिषु, भौतिकेषु = पाञ्चभौतिकेषु, पिण्डेषु अनास्था = अनादरः, खलु = किल।

Renu Devi
22/08/20
राधाउमाकान्त सं० महावि० सुखसेना, पूर्णिया

शास्त्री - II

साहित्य

रघुवंश महाकाव्यम्

त्रयोदशः सर्गः

Saathi

Date ___/___/___

प्र० (1) - पद्यमिदम् व्याख्येयम् ।

सैषा स्थली यत्र विचिन्वता त्वां भ्रष्टं मया नूपुरमेकमुर्व्याम् ।
अदृश्यत त्वच्चरणारविन्दविश्लेषदुःखादिव बद्धमौनम् ॥

उत्तरम् - प्रसंगः - प्रस्तुतोऽयं श्लोकः महाकवि कालिदास प्रणीतस्य रघुवंश महाकाव्यस्य त्रयोदश सर्गात् उद्धृतोऽस्ति ।

अस्मिन् श्लोके श्रीरामः सीतां प्रति कथयति हे जनकतनये! इदं तदेव स्थानम्, यत्र रावणेनापहृतां त्वां मार्गमाणेन मया, तव पादात् पृथिव्यां पतितं सत् त्वच्चरण वियोगदुःखादिव निःशब्दं स्थितं नूपुरं दृष्टमिति भावः ।

व्याख्या - सा = एषा, स्थली = पूर्वानुभूता सम्प्रति दृश्यमाना च पुनः प्रत्यभिज्ञायते । यत्र = स्थल्याम् । त्वाम् = भवतीम् । विचिन्वता = अन्वेषयता । मया = रामेण । त्वच्चरणारविन्दविश्लेषदुःखाद् इव = त्वत्पादकमल वियोगक्लेशाद् इव । बद्धमौनम् = निःशब्दम् । उर्व्याम् = पृथिव्याम् । भ्रष्टम् पतितम् । एकं नूपुरम् = पादांगदम् । अदृश्यत = अलक्ष्यत दृष्टम् । पुरा हि रावणेन प्रसभमपह्रियमाणा सीता अनेनैव मार्गेण नीता, इति रामस्य परिज्ञानार्थं पादात् पृथिव्यां नूपुरं पातयामासेति रामायणीया कथाऽत्रानुसन्धेया

Renu Devi

22/08/20

राध्या उमाकान्त सं० महावि० सुखसेना, पूर्णिया

Page No.